Reg. No. | | | | | | | | | |

# BCASKL 153

**Credit Based Second Semester B.C.A. Degree Examination, September 2022**
**(2018 – 19 and Earlier Batches)**
**SAMSKRITUM**
**Sanskrit Language**

Time : 3 Hours    Max. Marks : 80

***सूचना :*** *1) **संस्कृत**भाषया, **कर्णाटक**भाषया, **आङ्ग्ल**भाषया वा उत्तराणि लिखत ।*
*2) प्रश्नसंख्या **4** तथा **5** प्रश्नयो: **संस्कृतेनैव** उत्तरं लेखनीयम् ।*

1. अधोनिर्दिष्टपद्यभागेषु **द्वयो:** भाषान्तरं कृत्वा विवृणुत ।    **(2×5=10)**

1.1) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यश: सुखकरी विद्या गुरूणां गुरु: ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न तु धनं विद्याविहीन: पशु: ।।

1.2) त्वमेव तावत्परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हत: ।
वधूदुकूलं कलहंसलक्षणं
गजाजिनं शोणितबिन्दुवर्षि च ।।

1.3) चापादपाकृष्य नरेन्द्रसूनो
शिलीमुखं तूणमुखे निधेहि ।
सम्पादयिष्यत्ययमीप्सितं यत्
तवानुरूपं तनुरूपलक्ष्म्या: ।।

2. अधोनिर्दिष्टवाक्येषु **पञ्चानां** सन्दर्भसहितं विवरणं लिखत ।    **(5×3=15)**

2.1) छायेव मैत्री खलसज्जनानाम् ।

2.2) महाजन: स्मेरमुखो भविष्यति ।

2.3) जनापवादात् भजेद् भीतिम् ।

2.4) वृथैव दण्डिना प्रोक्ता सर्वशुक्ला सरस्वती ।

**P.T.O.**

2.5) धिक् तां च तं च मदनं च इमां च मां च ।

2.6) मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ।

2.7) अहेतुकोऽयं मयि पक्षपातः ।

3. **चतुर्णां** प्रश्नानां प्रबन्धात्मकम् उत्तरं लिखत । **(4×8=32)**

3.1) जटिलः शिवदोषान् कथम् उद्गिरति ? लिखत ।

3.2) हंसनलयोः मैत्रीप्रसङ्गं विवृणुत ।

3.3) पित्रा तिरस्कृतेन ध्रुवेण साधिताम् उन्नतिं वर्णयत ।

3.4) नीतिशतकस्य दशपद्धतीः सोदाहरणं निरूपयत ।

3.5) गीताचार्योक्तान् यज्ञ–तपो–दान–प्रभेदान् अधिकृत्य प्रबन्धं लिखत ।

3.6) 'जनापवादाद्भजेद्भीतिम्' – इत्युक्तिः कृष्णस्य जीवने कथं अन्वेति इति वर्णयत ।

4. **द्वयोः संस्कृत**भाषया टिप्पणीं रचयत । **(2×4=8)**

4.1) कालिदासः ।

4.2) भगवद्गीता ।

4.3) सुभाषितानि ।

4.4) ध्रुवः ।

5. अधोनिर्दिष्टेषु वाक्येषु **पञ्चदशानां** निर्देशानुसारं **संस्कृत**भाषया उत्तरं लिखत । **(15×1=15)**

अ) रेखाङ्कितपदानां कारकं सूचयत ।

5.1) महाजनः हसति । (कर्तृ, कर्म, करणं)

5.2) गगनात् उल्का पतिता । (कर्म, अपादानं, सम्प्रदानं)

5.3) नलः करेण कण्ठे स्पृशति । (कर्तृ, कर्म, करणं)

5.4) गुरवे दक्षिणा दीयताम् । (कर्तृ, कर्म, सम्प्रदानं)

5.5) नलः वनान्तेषु चचार । (अधिकरणं, सम्प्रदानं, अपादानं)

आ) युक्तं समासनाम लिखत ।

5.6) नलश्च दमयन्ती च । (द्वन्द्वः, द्विगुः, तत्पुरुषः)

5.7) न सामान्यम् । (द्वन्द्वः, द्विगुः, नञ् तत्पुरुषः)

5.8) इच्छां अनतिक्रम्य । (तत्पुरुषः, अव्ययीभावः, द्विगुः)

5.9) विरूपाणि अक्षीणि यस्य सः । (बहुव्रीहिः, तत्पुरुषः, द्विगुः)

5.10) नीलः च असौ कण्ठः च । (द्विगुः, बहुव्रीहिः, कर्मधारयः)

इ) युक्तं कृदन्तरूपं विलिख्य वाक्यं पूरयत ।

5.11) छात्राः पाठं _________ । (पठितवन्तः, पठितवन्तं, पठितवान्)

5.12) सः शालां _________ इच्छति । (गता, गतं, गन्तुं)

5.13) उमा मालां _________ अस्ति । (समर्पयन्, समर्पयन्ती, समर्पयन्तं)

5.14) अहं वनं _________ । (गतवान्, गतस्य, गतवन्तं)

5.15) त्वां _________ महाजनः हसति । (विलोकिता, विलोकितेन, विलोक्य)

ई) युक्तं तद्धितरूपं लिखत ।

5.16) पाण्डोः अपत्यं पुमान् _________ । (पाण्डवः, पाण्डवानां, पाण्डुः)

5.17) हिमवतः अपत्यं स्त्री _________ । (हिमवान्, हिमवती, हैमवती)

5.18) वसुदेवस्य अपत्यं पुमान् _________ । (वसुदेवः, वसुदैवः, वासुदेवः)

5.19) दिगम्बरस्य भावः _________ । (दिगम्बरत्वं, दिगम्बरः, दिगम्बरा)

5.20) मानवस्य भावः _________ । (मानवः, मानवता, मनुः)